# Mithilamahatmyam from Brihadvishnupurana

# બૃહદ્વિષ્ણુપુરાણીય મિથિલામાહાત્મ્યમ્

## Document Information

Text title : Mithila Mahatmyam

File name : mithilAmAhAmtyam.itx

Category : misc, tIrthakShetra, sItA

Location : doc_z_misc_general

Proofread by : Mrityunjay Pandey

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 4, 2024

*sanskritdocuments.org*

# બૃહદ્વિષ્ણુપુરાણીય મિથિલામાહાત્મ્યમ્

## ૧૩

મૈત્રેય ઉવાચ -
શ્રુતન્ત્વત્તો મયાસર્વં, રહસ્યં જાનકીપતેઃ ।
અયોધ્યાયાશ્ચ માહાત્મ્યં, તત્રાવાસફલન્તથા ॥ ૧॥

ઇદાનીં શ્રોત્રુમિચ્છામિ, રામન્તત્ત્વ વિવેકિનમ્ ।
જાનક્યાસ્તત્વ સર્વ્વસ્વં, યથાવેદેષુવર્ણિતમ્ ॥ ૨॥

પરાશર ઉવાચ -
સીતારામાત્મકં સર્વં સર્વકારણ કારણમ્ ।
અનયોરેકતાતત્ત્વં ગુણતોરૂપતોપિ ચ ॥ ૩॥

તત્પદં રામઇત્યુક્તં જાનકી ભાવરૂપિણી ।
તયોરૈક્યં ભવેત્તત્વમિતિ વેદવિદો વિદુઃ ॥ ૪॥

તત્વતો મન્ત્રતો વાપિ રૂપતો ગુણતોઽપિ વા ।
ન પૃથગ્ ભાવના યસ્ય સ જ્ઞેયો ભાવુકોત્તમઃ ॥ ૫॥

એવમેવ મયા પૃષ્ઠો વશિષ્ઠો માંસમાદિશત્ ।
યથા તમ્પૃચ્છતઃ પ્રાહ તત્સમાસેન મે શ ૃણુ ॥ ૬॥

રામાન્ન મૈથિલી ભિન્ના મૈથિલ્યાનરઘૂત્તમઃ ।
દ્વયોરૈક્યં વિજાનીયાત્તદ્વતો નૈવરૂપતઃ ॥ ૭॥

દ્વયોર્ન્નિત્યં દ્વિધારૂપં તત્ત્વતો નિત્યમેકતા ।
રામમન્ત્રે સ્થિતા સીતા સીતા મન્ત્રે રઘૂત્તમઃ ॥ ૮॥

યતો વર્ણાત્મકો રામઃ સીતા માત્રાત્મિકા સ્થિતા (ભવેત)।
યદ્વા શબ્દાત્મકોરામઃ સીતા શબ્દાર્થરૂપિણી ॥ ૯॥

યદ્વા વર્ણોભવેત્સીતા રામઃ શબ્દાર્થ રૂપવાન્ ।

એવમેવ વિધાનેન યથા સૂર્યે પ્રભાસ્થિતા ॥ ૧૦॥

રત્ને મૌલ્યં નૃપેકીર્ત્તિસ્તથારામેસ્થિતાતુ સા ।
જાનક્યાં રાઘવોપ્યેવ મદ્વૈધેન સદાસ્થિતઃ ॥ ૧૧॥

રામમૈક્યં દ્વયોરેવ વેદજ્ઞૈઃ પરિનિષ્ઠિતમ્ ।
યથાયોધ્યાપુરી નિત્યા મિથિલાપિ તથાસ્મૃતા ॥ ૧૨॥

સર્વ્વૈશ્વર્ય્ય ગુણૈર્વ્વાપિ નાયોધ્યાતઃ પૃથગ્મતા ।
અયોધ્યકા યથા નિત્યા સર્વ્વમઙ્ગલરૂપિણી ॥ ૧૩॥

તથૈવ મૈથિલાઃ સર્વ્વે સર્વ્વમઙ્ગલ વિગ્રહાઃ ।
નિત્યભૂતાઃ સદાશુદ્ધાઃ પુનરાવૃત્તિ વર્જિતાઃ ॥ ૧૪॥

નિત્યાનન્દ રસાસ્વાદ રૂપિણો રામપાર્ષદાઃ ।
શ્રીરામારાધકાનાઞ્ચ નિરાસાર્થમ્વિશેષતઃ ॥ ૧૫॥

મિથિલા સર્વથા શક્ત્યા યથાયોધ્યા તથાહિસા ।
નિષ્કામાનાં સકામાનાં જ્ઞાનાનાં જ્ઞાન શાલિનામ્ ॥ ૧૬॥

કથઞ્ચિત્તત્ર ચેદ્વાસ ઉદ્ધારાય ભવેદલમ્ ।
તત્ર યાત્રા મહાપુણ્યા સર્વ્વકામ સમૃદ્ધિની ॥ ૧૭॥

એવં રહસ્યં તત્વસ્ય વર્ણયન્તિ મનીષિણઃ ।
દ્વયોર્ન્નામ દ્વયોર્દ્ધામ દ્વયોસ્તત્વં દ્વયોર્વ્રતમ્ ॥ ૧૮॥

દ્વયોરારાધનાનાઞ્ચ દ્વયોઃ પ્રીતિકરંસમમ્ ।
ઇતિયેષાન્નચેદ્ભાવસ્તે નરાઃ પાપભાગિનઃ ॥ ૧૯॥

સંસારેષુ નિમજ્જન્તે સ્વકર્મ્મ પરિવઞ્ચિતાઃ ।
વશિષ્ઠેન સમાખ્યાતા ત્વત્પ્રીત્યા વર્ણિતમ્મયા ॥ ૨૦॥

સિદ્ધાન્ત વીજમપરં શ‍ૃણુષ્વૈકમના મુને ।
સર્વ્વાધારં જગન્મૂલં સર્વ્વકારણ કારણમ્ ॥ ૨૧॥

વેદ વેદાન્ત સિદ્ધાન્તં યત્તત્પ્રણવ રૂપકમ્ ।
અનાદિમધ્ય નિધનં વ્યયદેશ્ય ગુણૈઃ પરમ્ ॥ ૨૨॥

વહિરન્તશ્ચ નિઃસ્યૂત મવાઙ્મનસગોચરમ્ ।
અનાદિમધ્ય નિધનં વ્યયદેશ્યગુણૈઃ પરમ્ ॥ ૨૩॥

નિષ્કલં નિષ્પ્રતિદ્વન્દ્વં નિર્વિકારં નિરઞ્જનમ્ ।
સત્તામાત્રં પરમ્બ્રહ્મ સદસત્પરમેવ યત્ ॥ ૨૪॥

વિદ્યાવન્તો મહાત્માનઃ સ્વસ્વતર્ક્કાનુસારતઃ ।
નિરૂપયન્તિ યત્કિઞ્ચિત્ સ્વસ્વ ગ્રન્થેષુ તાન્ત્રિકમ્ ॥ ૨૫॥

તદ્વ્યાપકસ્યરૂપસ્ય નિર્ગુણસ્યપરાત્મનઃ ।
પ્રભાવાત્કારણંરામ ઇતિનારદ સમ્મતે ॥ ૨૬॥

તચ્છક્તિર્જાનકીરૂપા તેનાભિન્ના મહામુને ।
સૂક્ષ્મમજ્ઞાન સર્વ્વસ્વ મિતિજ્ઞાત્વાવિમુચ્યતે ॥ ૨૭॥

જ્ઞાનસ્યૈએષાપરાકાષ્ઠા સર્વ્વભાવજ્ઞ સમ્મતિઃ ।
સમાપ્તિરત્રગ્રન્થાનાં વાચ્યવાચક સમ્પદામ્ ॥ ૨૮॥

એતાવદ્વેદ સર્વ્વસ્વમેષાવૈ બ્રહ્મ સમ્મતિઃ ।
યદનેન પ્રકારેણ સીતારામૌહૃદિન્યસેત્ ॥ ૨૯॥

સીતારામૌ સ્વયં ધર્મી સીતારામૌ સ્વયમ્પ્રભુઃ ।
સીતારામૌ જગદ્બીજં સીતારામૌ સ્વયઞ્જગત્ ॥ ૩૦॥

સર્વેષાં સાધકાનાઞ્ચ યદર્થમ્વૈ પરિશ્રમઃ ।
લક્ષણૈર્વહુમિર્લક્ષ્યૌ સીતારામૌગતિઃ સતામ્ ॥ ૩૧॥

જ્ઞાનસ્યૈષા પરાકાષ્ઠા વિજ્ઞાનસ્યાશ્રયઃ પરઃ ।
વિજ્ઞાયૈતા પ્રયત્નેન કૃતકૃત્યો ભવેન્નરઃ ॥ ૩૨॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે ત્રયોદશોઽધ્યાયઃ ।

## ૧૪

મૈત્રેય ઉવાચ -
એતદ્રહસ્યમતુલં વિજ્ઞાનં જાનકીપતેઃ ।
પુનર્વિસ્તરતઃ કિઞ્ચિચ્છ્રોતુમિચ્છામિતત્વતઃ ॥ ૩૩॥

સ્વરુપન્નામચ વ્યક્તં ચરિત્રઞ્ચાપિ વિશ્રુતમ્ ।
કેષાઞ્ચિદપિ લોકેસ્મિન્ કેષુશક્નાનવિદ્યતે ॥ ૩૪॥

પરન્ત્વયોધ્યયાતુલ્યા મિથિલાવર્ણિતાત્વયા ।
તસ્યા વિસ્તાર વ્યાયામ સ્વરૂપાણિ વદસ્વમે ॥ ૩૫॥

તસ્યાં યાત્રાં કથઙ્કાલે કાર્ય્યા સર્વૈર્મુમુક્ષુભિઃ ।
કેદેવાસ્તત્ર વૈસન્તિ, તેષાં નામાનિમેવદ ॥ ૩૬॥

પરાશર ઉવાચ -
ગઙ્ગા હિમવતોર્મધ્યે નદીપઞ્ચદશાન્તરે ।
તૈરભુક્તિરિતિખ્યાતો દેશઃ પરમપાવનઃ ॥ ૩૭॥

કૌશિકી કમલાચૈવ તથાવિણ્વવતીમતા ।
યમુનાચેતિ વિખ્યાતા ભૂયસી ગૈરિકાતથા ॥ ૩૮॥

જલાધિકાદ્ધાગમતી તથાવ્યાઘ્રમતીમતા ।
વિરજા ગણ્ડલાચૈવ તથૈવેક્ષ્વાવતીતિ ચ ॥ ૩૯॥

લક્ષ્મણા વાગ્મતી ખ્યાતા ગણ્ડકીતિ તતઃપરા ।
ઇતિપૂર્વ્વક્રમાત્પ્રોક્તં નદીનામાનિ દર્શયન્ ॥ ૪૦॥

અકુક્ષિર્વર્ત્તિનીચૈવ જઙ્ઘા જીવાપિકાતથા ।
ઇત્યાદ્યા બહવસ્સન્તિ નદ્યોહિમવદુદ્ભવાઃ ॥ ૪૧॥

કૌશિકીન્તુ સમારભ્ય ગણ્ડકીમધિગમ્યવૈ ।
યોજનાનિ ચતુર્વિંશ વ્યાયામઃ પરિકીર્ત્તિતઃ ॥ ૪૨॥

ગઙ્ગા પ્રવાહમારભ્ય યાવદ્ધૈમવતમ્વનમ્ ।
વિસ્તારઃ ષોડ઼શપ્રોક્તો દેશસ્ય કુલનન્દન ॥ ૪૩॥

મિથિલા નામનગરી, તત્રાસ્તેલોક વિશ્રુતા ।
પઞ્ચભિઃ કારણૈઃ પુણ્યા, યાવિખ્યાતા જગત્રયે ॥ ૪૪॥

નિમિર્ન્નામ મહારાજ, ઇક્ષ્વાકો મુનયોનૃપઃ ।
તેનતપ્તં તપોઘોરં યેનખ્યાતન્તપોવનમ્ ॥ ૪૫॥

સુવર્ણમણિરૂપત્વાત્પૂર્વ્વસ્મિન્હિ તપોવને ।
સુવર્ણકાનનન્નામ, તેનખ્યાતિ પથઙ્ગતમ્ ॥ ૪૬॥

પુનસ્તથૈવનગરી નિર્મ્મિતા મિથિલામુને ।
તત્રજાતો મિથિર્ન્નામ તેનસા મિથિલાભવેત્ ॥ ૪૭॥

દેવરાત તપોભૂમિઃ શિવતુષ્ટિકરીમતા ।
યત્ર પ્રાપ્તં ધનૂરત્નં તેન યા સામ્મવીવભૌ ॥ ૪૮॥

પુનઃ સીરધ્વજો રાજા સ્વર્ણલાઙ્ગલ પદ્ધતૌ ।

પ્રાપ્તવાં સ્તનયાયત્ર તેનસાર્થકરિશ્રુતા ॥ ૪૯॥

ધનુર્ય્યજ્ઞં કૃતમ્પૂર્વ્વં પુત્રાર્થ યત્સ્વયમ્વરે ।
વિત્રોષ્ટિતં ધનુર્ય્યત્ર રામેણાદ્ભુતકર્મ્મણા ॥ ૫૦॥

એતદર્થમ્વિશેષેણ બ્રહ્મરુદ્રાદિ દેવતાઃ ।
સમર્ચયન્તિ યત્નેન, નિવસન્તિ તરન્તિ ચ ॥ ૫૧॥

મિથિલા તૈરભુક્તિશ્ચ વૈદેહી નિમિકાનનમ્ ।
જ્ઞાનક્ષેત્રં કૃપાપીઠં સ્વર્ણલાઙ્ગલ પદ્ધતિઃ ॥ ૫૨॥

જાનકીજન્મભૂમિશ્ચ, નિરપેક્ષા વિકલ્મષાઃ ।
રામાનન્દકરીવિશ્વ, ભાવિની નિત્યમઙ્ગલા ॥ ૫૩॥

ઇતિદ્વાદશ નામાનિ યઃ પઠેચ્છૃણુયાદપિ ।
સપ્રાપ્નુયાદ્રાઘવશ્રેષ્ઠમ્ભુક્તિમ્મુક્તિઞ્ચ વિન્દતિ ॥ ૫૪॥

પ્રયાગાદીનિ તીર્થાનિ સન્તિ લોકેષુ પુણ્યદા ।
પરન્તુ રામપ્રાપ્ત્યર્થં તેષાંશક્તિર્ન વિદ્યતે ॥ ૫૫॥

ઇયં સર્વ્વ પ્રકારેણ રામતુષ્ટિકરી ધ્રુવમ્ ।
યથા સાકેત નગરી જગતઃ કારણ સ્ફુટમ્ ॥ ૫૬॥

તથૈવાનન્દ સર્વ્વસ્વ કારણન્નગરીત્વિયમ્ ।
મહર્ષયો મહાભાગાસ્ત્યક્ત્વા સર્વ્વ પરિગ્રહમ્ ॥ ૫૭॥

નિવસન્તિ પ્રયત્નેન રામારાધન હેતવે ।
વિશ્વામિત્રસ્તુ પૂર્વ્વસ્યાન્દિશિવાસં પ્રકલ્પયેત્ ॥ ૫૮॥

વિભાતુકે મહાયોગી દક્ષિણે નિવસત્યસૌ ।
ગૌતમસ્યાશ્રમં પુણ્યં યામ્ય પશ્ચિમકોણકે ॥ ૫૯॥

નિવસન્ત્યુષ્ટજં કૃત્વા વાલ્મીકિસ્તત્ર પશ્ચિમે ।
ઉત્તરે યાજ્ઞવલ્ક્યસ્તુ નિવાસે મિતરસ્સદા ॥ ૬૦॥

એવમેવ પ્રકારેણ વસન્ત્યન્ય મહર્ષયઃ ।
સનદી માતૃકોદેશઃ દુર્ભિક્ષાભિર્વિવર્જિતઃ ॥ ૬૧॥

ધનધાન્ય સમાયુક્તો વનાગમ સમન્વિતઃ ।
પ્રસસ્ત નરનારીક આધિવ્યાધિ વિવર્જિતઃ ॥ ૬૨॥

સદામ્રવન સમ્પન્ના નદીતીરેષુ સંસ્થિતાઃ ।
તીરેષુ ભુક્તિ યોગેન તૈરભુક્તિરિતિસ્મૃતા ॥ ૬૩॥

હિમાલયસ્યવાસાર્થ મુનિભિઃ પરિરઞ્જિતઃ ।
રાજાનશ્ચ મહાભાગા જ્ઞાનવિજ્ઞાન દર્શનાઃ ॥ ૬૪॥

જીવન્મુક્તા વિદેહાશ્ચ, દેહવન્તો વિકલ્મષાઃ ।
અનુષ્ઠિતારો યજ્ઞાનાં બ્રાહ્મણા પરિપૂજકાઃ ॥ ૬૫॥

નિમિવંશ્યા ઋષિપ્રાજ્ઞા એવન્તત્ર મહામુને ।
અન્યત્કિંયત્ર સાવિત્રી ગૌરીશ્રીદેવશક્તયઃ ॥ ૬૬॥

નિવસન્તિ પ્રયત્નેન સર્વસિદ્ધિ પ્રદાયિકાઃ ।
યત્ર સાક્ષાત્સ્વયં ભૂમૌ સીતાસર્વ્વેશ્વરેશ્વરી ॥ ૬૭॥

આવિર્ભૂતા વિશેષેણ શ્રેષ્ઠા રાઘવવલ્લભા ।
સર્વ્વે દેવા મહાભાગા ઋષયો બ્રાહ્મ્ય લૌકિકાઃ ॥ ૬૮॥

આરાધયન્તિ યાં યત્નાત્ સ્વેષ્ટાયાશ્ચ પ્રકામ્યયા ।
યસ્યાપ્રસાદતોન્યત્ર કલ્પકોટિશતૈરપિ ॥ ૬૯॥

નપ્રીણાતિ રઘુશ્રેષ્ઠસ્તપોયોગ સમાધિભિઃ ।
અતસ્તીર્થેષુ સર્વેષુ મિથિલા પૂજ્યતેસદા ॥ ૭૦॥

મિથિર્યેન નમસ્યન્તિ દેશાન્તર ગતાઅપિ ।
તેષાં ભુક્તિશ્ચમુક્તિશ્ચ જાયતેનાત્ર સંશયઃ ॥ ૭૧॥

તસ્માત્સર્વ પ્રયત્નેન રામસ્યારાધનન્નરઃ ।
મિથિલાયાં વસેત્તત્ર ત્યક્ત્વા સર્વ પરિગ્રહમ્ ॥ ૭૨॥

-ઇતિ શ્રીવૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે ચતુર્દશોઽધ્યાયઃ ।

## ૧૫

મૈત્રેય ઉવાચ -
યાનિ લિઙ્ગાનિ પુણ્યાનિ, યાનિ વેદોદિતાનિ ચ ।
તત્ર સન્તિ મહાભાગ તેષાન્નામાનિ મે વદ ॥ ૭૩॥

પરાશર ઉવાચ -
શિલાનાથાભિધંલિઙ્ગં તથા વૈ કપિલેશ્વરમ્ ।

સર્વ્વસિદ્ધિપ્રદં નૃણાં પૂર્વદ્વારે પ્રતિષ્ઠિતમ્ ॥ ૭૪॥

કૂપેશ્વરં તથાગ્નેયે લિઙ્ગં સર્વ્વાઘ નાશનમ્ ।
યામ્યાં સિદ્ધિપ્રદંલિઙ્ગં કલ્યાણેશ્વર નામકમ્ ॥ ૭૫॥

પૂર્વસિદ્ધિપ્રદંલિઙ્ગં વારુણ્યાઞ્ચ જલેશ્વરમ્ ।
સૌમ્યે જલાધિનાથાખ્યં તત્રક્ષીરેશ્વરમ્મતમ્ ॥ ૭૬॥

ઐશાન્યાં ત્રિજગત્ખ્યાતમન્ચોવૈ મિથિલેશ્વરમ્ ।
ભૈરવાખ્યો મહાદેવો નૈઋત્યાં ગ્રામરક્ષકઃ ॥ ૭૭॥

એવમાદીનિ લિઙ્ગાનિ નૈકશઃ સંસ્થિતાનિ ચ ।
યોગનિદ્રા મહામાયા તથાનગરદેવતા ॥ ૭૮॥

ગિરિજાદ્યા મહાભાગા ખ્યાતાઃ પરમશક્તયઃ ।
વહૂનિ પુણ્ય ખ્યાતાનિ તાસાં નામાનિ મે શ◌ૃણુ ॥ ૭૯॥

પુરન્દરસરઃ પુણ્ય તતોદાસરથઃ સરઃ ।
ભાર્ગવં મણ્ડલઞ્ચાક્ષં વિડ઼◌ાલં રુક્મિણીસરઃ ॥ ૮૦॥

જનકસ્યસરઃ પુણ્યં સુનેત્રાયાઃ સરસ્તથા ।
બલદેવ સરસ્તદ્વત્ ગોપાલશ્ચ સરોવરમ્ ॥ ૮૧॥

ધનુઃક્ષેત્રમિતિ ખ્યાતં પાદપ્રચ્છાલનંસરઃ ।
વિચિત્રાઽધૂતપાપા ચ તથાચુઞ્ચુમતી તથા ॥ ૮૨॥

પયસ્વિની કુણ્ડમતી વિખ્યાતા તિલદીર્ઘિકા ।
લક્ષ્મણાખ્યા ગુણવતી તથા વિલ્વવતીમતા ॥ ૮૩॥

દીર્ઘિકા મહતીપુણ્યા ઇષ્ટદા વિઘ્નહારિણી ।
મત્સ્યોદરી વ્યાઘ્રહરી સ્થિતિદાચ્છહારિણી ॥ ૮૪॥

ગોવ્રજા ચિત્રધારાખ્યા ખ્યાતા પૂર્વ્વવતાતથા ।
દુર્ગયા ચિત્રધારીચ તથાખણ્ડહરી શુભા ॥ ૮૫॥

પુણ્યા પાકવતી ખ્યાતા તથા નગરદેવિકા ।
સનકાદિસરઃ પુણ્યો તરણમ્મન્મથઃ સરઃ ॥ ૮૬॥

મન્થાનં કૌશલં ચક્રં લોમશં રામસાગરમ્ ।
સપ્તવેધાભિધં તીર્થં ધ્રુવં ગાડ઼◌ુરમેવ ચ ॥ ૮૭॥

કેદાર વહ્નિકુણ્ડઞ્ચ મધ્યમં જાનકીસરઃ ।
કુમ્માદિકં વારુણઞ્ચ તથાસારસ્વતંસરઃ ॥ ૮૮॥

ચતુર્દ્દીર્ઘિકમાખ્યાતા તથાકષ્ટહરંસરઃ ।
ધાત્રી સરો વિષહરઃ વિખ્યાતં મુરલીસરઃ ॥ ૮૯॥

ગઙ્ગાસરસમિત્યુક્તં અઙ્ગરાગાભિધં સરઃ ।
ગૌતમસ્ય સરઃ પુણ્યં વશિષ્ઠસ્યસરસ્તથા ॥ ૯૦॥

ઇત્યુક્તંસરસાન્નામ કૂપનામાનિમેશ્રુણુ ।
પુણ્યં સૈરધ્વજકૂપં શતાનન્દસ્ય કૂપકમ્ ॥ ૯૧॥

અક્રૂરકૂપમિત્યુક્તં કૂપસૈમનકન્તથા ।
વિદ્યાકૂપં જ્ઞાનકૂપં ઇતિલોકેષુ વિશ્રુતમ્ ॥ ૯૨॥

મહાભાગવત શ્રેષ્ઠ વર્ણિતા યે જલાશ્રયાઃ ।
તેષાં સ્નાનપાનેન મહાપુણ્યં ફલમ્ભવેત્ ॥ ૯૩॥

પુણ્યાતિરેકતોલભ્યા મિથિલાજાયતેસતામ્ ।
તેષાં યાત્રામહાભાગ તત્રકોણેષુ સૂરિભિઃ ॥ ૯૪॥

ક્રિયતે પરયાભક્ત્યા પુરાણેષુ વિનિશ્ચિતમ્ ।
મણ્ડલાનાં પરાસશ્ચ મિથિલાયાં પ્રશસ્યતે ॥ ૯૫॥

યેનકેન પ્રકારેણ ગમનં સર્વ્વ સિદ્ધિદમ ।
એકાહમ્બાત્ર્યહમ્વાસો માસિકં વાર્ષિકન્તથા ॥ ૯૬॥

જન્માવધિફલં પુણ્યં સંસારેઽર્જ્જિત પુણ્યકમ્ ।
અષ્ટનંસર્વ્વતીર્થેષુ તત્તદુદ્દેશ્ય દૈવતમ્ ॥ ૯૭॥

સ્નાનં દાનં તપોહોમસ્તર્પણં શ્રાદ્ધમેવ ચ ।
દ્વિજાનાં ભોજનઞ્ચૈવ તીર્થસમ્પત્તિ હેતવે ॥ ૯૮॥

પરિક્રમાપિ ત્રિવિધા વૃહતીમધ્યમાલઘુ ।
માર્ગશીર્ષેઽથવામાઘે ફાલ્ગુને માધવેપિ ચ ॥ ૯૯॥

પરિક્રમા પ્રકર્ત્તવ્યા નદીમારભ્ય કૌશિકીમ્ ।
બ્રહ્મચર્ય વિધાનેન હવિષ્યાશી જિતેન્દ્રિયઃ ॥ ૧૦૦॥

શુદ્ધ્યન્તિ રામકોભૂત્વા ભક્તવૃન્દૈઃ સમન્વિતઃ ।
સિંહેશ્વરં શિવન્નત્વા ધ્યાત્વાદેવ રઘૂત્તમમ્ ॥ ૧૦૧॥

સઙ્કલ્પમાદિતઃ કૃત્વા પરિતઃ પરિપ્રક્રમેત્ ।
કૌશિકીસઙ્ગમેસ્નાત્વા સઙ્ગમેજાહ્નવીતટે ॥ ૧૦૨॥

શાલગ્રામીંલભેય્યાવત્તાવદ્વૈ પશ્ચિમામ્મુખઃ ।
પુનર્હૈમવતમ્પ્રાપ્તઃ પુનસ્તત્કૌશિકીતટે ॥ ૧૦૩॥

નત્વાકામેશ્વરંલિઙ્ગં પુનઃ સિંહેશ્વરમ્વ્રજેત્ ।
સમાપ્ય નિયમન્તત્ર પુનરાયાત્સ્વમાલયમ્ ॥ ૧૦૪॥

મનોવાક્કાયજં નિત્યં પાતકઞ્ચોપપાતકમ્ ।
સર્વ્વં નશ્યત્યયત્નેન સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૦૫॥

પ્રીયન્તે પિતરસ્તસ્ય પ્રીયન્તેતસ્યદેવતાઃ ।
પ્રીયતે રાઘવોરામઃ સ્વશક્ત્યા સીતયાસહ ॥ ૧૦૬॥

એવંહિ વૃહતીયાત્રા વર્ણિતા બ્રહ્મવાદિભિઃ ।
તત્રાશક્યોજનઃકશ્ચિત્ પુરીમાત્રં પરિભ્રમેત્ ॥ ૧૦૭॥

કલ્યાણેશ્વરમારભ્ય નિવિશેદ્ગિરિજાલયે ।
પુનર્જલેશ્વરઙ્ગત્વા પુનઃક્ષીરેશ્વરં વ્રજેત્ ॥ ૧૦૮॥

વિશ્રમ્ય ચ ધનુસ્થાને પુનઃ કલ્યાણ પીઠકે ।
અપરઞ્ચકલૃકી પ્રોક્તા મિથિલાયાઃ પરિક્રમા ॥ ૧૦૯॥

પ્રલાપમ્વા વિલાપમ્વા મિથ્યાભાષણમેવ વા ।
અસદ્વાર્ત્તાદિકં સર્વ્વં વર્જયેત્સાધકોત્તમઃ ॥ ૧૧૦॥

પૂર્વોક્ત વિધિનાસમ્યક્ બ્રહ્મચર્ય્યવ્રતેસ્થિતાઃ ।
રામેનિષ્ઠા મનોદ્વારં મલમૂત્રાણિચોત્સૃજેત્ ॥ ૧૧૧॥

અન્યથાચાચરન્ મૌર્ખ્યાન્નરઃ પ્રાપ્નોતિ કિલ્વિષમ્ ।
પ્રયાતિવાધમાંલ્લોકાન્ રામદ્વેષી ભવેત્તુસઃ ॥ ૧૧૨॥

તસ્માચ્છુદ્ધ તનુશ્શાન્તો ભજન્ રામમનન્યધીઃ ।
પરિક્રાન્તેલ્લભેદ્ભક્તિં લોકમુક્તિન્તથાપરે ॥ ૧૧૩॥

મધ્યમાસા ભવેદ્યાત્રા સર્વાઘૌઘ નિવારિણી ।
તત્રાપ્યશક્તશ્ચેત્કશ્ચિત્ પરિક્રાન્તોઽન્તરગૃહમ્ ॥ ૧૧૪॥

ગઙ્ગાસાગરમારભ્ય સ્નાનયાત્રાં સમારભેત્ ।

ધનુઃક્ષેત્રં પુનઃસ્નાત્વા પુરન્દરસરમ્વ્રજેત્ ॥ ૧૧૫॥

કૌશલેયસરોગત્વા સ્નાત્વાવૈ જાનકીહૃદે ।
વહ્નિકુણ્ડં સમાગત્ય મધ્યમં કુણ્ડમાવ્રજેત્ ॥ ૧૧૬॥

રત્નસાગરમાગત્ય કૌણ્ડિલ્યસ્યસરોવ્રજેત્ ।
અઙ્ગરાગાભિધં તીર્થં ગત્વાવૈસાધકોત્તમઃ ॥ ૧૧૭॥

પુનર્લક્ષ્મણકુણ્ડેતુ ગત્વા સાગરસઙ્ગમે ।
સ્નાનાદિકં વિધાયેત્થં લોકપૂજ્યોભવેન્નરઃ ॥ ૧૧૮॥

સર્વસિદ્ધિમવાપ્નોતિ જનઃ પ્રક્ષીણ કલ્મષઃ ।
તન્ત્રસ્નાનં મહાભાગે પ્રાયશ્ચિત્તમિતઃ પરમ્ ॥ ૧૧૯॥

તત્રાપ્યંશક્તઃ કશ્ચિચ્ચેદ્ ગત્વા ધર્મઞ્ચ તદ્વનમ્ ।
સહાયમ્વા યથાશક્તિઃ કુર્યાદ્વામાર્ગશોધનં
પરિક્રમાવતામ્પુણ્યં સોઽપ્યવાપ્નોત્ય સંશયઃ ॥ ૧૨૦॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે પઞ્ચદશોઽધ્યાયઃ ॥

## ૧૬

પરાશર ઉવાચ -
કૌશલેન્દ્રઃસરઃ સ્નાયાન્માર્ગમાસે વિશેષતઃ ।
માર્ગેવૈ મણ્ડનં તીર્થં પાદપ્રચ્છાલનંસરઃ ॥ ૧૨૧॥

રામલક્ષ્મણસીતાનાં સરાંસિ ફલદાનિવૈ ।
પૌષેત્રૃક્ષસરઃ સ્નાયાત્પૂર્ણિમાયાં વિશેષતઃ ॥ ૧૨૨॥

પુરન્દર સરોમાઘે પઞ્ચમ્યાં શોભને શુભઃ ।
ફાલ્ગુને પૂર્ણિમાયાઞ્ચ વહ્નિકુણ્ડં મહાફલમ્ ॥ ૧૨૩॥

જ્યેષ્ઠ શુક્લ દશમ્યાન્તુ ગઙ્ગાતીર્થં વિશિષ્યતે ।
આષાઢસ્યાન્તિમે સ્નાયાદ્દીર્ઘિકાયામ્વિશેષતઃ ॥ ૧૨૪॥

શ્રાવણે બલરામસ્ય તીર્થે પુણ્યમથાન્તિમે ।
ભાદ્ર મહર્ષિપઞ્ચમ્યાં સ્નાતવ્યં ભાર્ગવં સરઃ ॥ ૧૨૫॥

આશ્વિને મૃતકુણ્ડસ્ય સ્નાનં  સર્વ્વાઘ નાશનમ્ ।
કાર્ત્તિકેતુ ચતુર્દ્દશ્યાં સ્નાતવ્યાવૈ પયશ્વિનીમ્ ॥ ૧૨૬॥

એવં સામ્વત્સરી યાત્રા કાલેકાલે મહાફલમ્ ।
વિશેષેણ મહાભાગ નવમ્યાં રામજન્મનિ ॥ ૧૨૭॥

જાનકીજન્મવારેવા વિવાહે ચ તથાપિ વા ।
સર્વેષાં સ્નાનદાનાનિ મહાપુણ્યપ્રદમ્ફલમ્ ॥ ૧૨૮॥

કૌશિકીં માધવે સ્નાયાન્માઘેવૈ કમલાન્તથા ।
દુગ્ધાં વિલ્વવતીમ્માર્ગે કાર્ત્તિકે યમુનાન્તથા ॥ ૧૨૯॥

ભૂયસીં ગૈરિકાઞ્ચૈવમાશ્વિને ફલદામતા ।
ભાદ્ર જલાધિકાપુણ્યા જ્યેષ્ઠે વ્યાઘ્રવતીતથા ॥ ૧૩૦॥

વિરજા શ્રાવણે પુણ્યા મણ્ડલા ફાલ્ગુનેતથા ।
ઇષ્ટાવતી તથાપૌષે ચૈત્રેવૈ લક્ષ્મણાશુભા ॥ ૧૩૧॥

વાગ્મતી ફાલ્ગુનેશસ્તા ગણ્ડિકી ચાપિ કાર્ત્તિકી ।
મલમાસે વિશેષેણ ગૈરિકા ફલદાયિની ॥ ૧૩૨॥

ચન્દ્રસૂર્ય્યોપરાગેષુ સર્વાનદ્યઃ શુભાવહા ।
નિષ્કામાનાં વિશેષેણ નિયમોનાત્રવિદ્યતે ॥ ૧૩૩॥

સરાંસિ પુષ્કરિણ્યશ્ચ માર્ગશીર્ષે વિશેષતઃ ।
ચૈત્રેવા સ્નાનતઃ પુણ્યા નવમ્યાં માધવેતથા ॥ ૧૩૪॥

વિશેષેણ મહાભાગ સ્નાતવ્યઃ પઞ્ચપર્વ્વસુ ।
પુણ્યં સર્વ્વેષુ યોગેષુ નાત્રકાર્ય્યાવિચારણા ॥ ૧૩૫॥

નવરાત્રદ્વયોર્મધ્યે પૂજનીયાઃ પ્રયત્નતઃ ।
સર્વ્વેગિરાધિરાસામ્યં ફાલ્ગુને શામ્ભવેતિથૌ ॥ ૧૩૬॥

એવં યાત્રા ક્રમઃ પ્રોક્તો મિથિલાવાસિનાં મુને ।
ન કાલનિયમસ્તેષાં યે પ્રાપ્તા દૂરદેશતઃ ॥ ૧૩૭॥

મિથિલાવાસ માસાદ્યજીવન્મુક્તો ભવેન્નરઃ ।
દેહાન્તે રાઘવં પ્રાપ્ય તદ્ભક્તૈઃ સહમોદતે ॥ ૧૩૮॥

સ્નાનન્દાનઞ્જપોહોમઃ દેવતાર્ચ્ચન વન્દનમ્ ।
ઇષ્ટગર્ત્તાદિકંસર્વ્વં મિથિલાયાં મહત્ફલમ્ ॥ ૧૩૯॥

વિશેષેણ પ્રતિષ્ઠાયાઃ ફલંવક્તું ન શક્યતે ।

નિર્માય શૌધશિખરં યેનસંસ્થાપ્યતેહરિઃ ॥ ૧૪૦॥

સમુક્તઃ સઞ્ચિતૈઃ પાપૈઃ પ્રારબ્ધૈશ્ચ વિશેષતઃ ।
જીવન્મુક્તતમો ભૂત્વા હરેસ્સાયુજ્યમાપ્નુયાત્ ॥ ૧૪૧॥

યોયો યાંયાં તનૂભક્તં તદુદ્દિશ્ય ચ દૈવતમ્ ।
સંસ્થાપ્ય પ્રતિમાં પુણ્યાં દેવલોકં સ ગચ્છતિ ॥ ૧૪૨॥

સર્વ્વસાધનજાતેભ્ય પ્રતિષ્ઠાતુ મહાફલા ।
મિથિલાયાં વિશેષેણ સારન્તુ નિયતંસ્મૃતમ્ ॥ ૧૪૩॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે ષોડષોડધ્યાયઃ ।

## ૧૭

મૈત્રેય ઉવાચ -
યએષ મિથિલામધ્યે પિનાકઃ પરિદૃશ્યતે ।
તસ્યાગમઃ પ્રભાવોવા યદ્યજ્જાનાસિ સંશમે ॥ ૧૪૪॥

પરાશર ઉવાચ -
સમ્યક્ પૃષ્ટન્ત્વયાબ્રહ્મન્ યદેતચ્છામ્ભવન્તનુઃ ।
તસ્યપ્રભાવો ધર્મ્મજ્ઞૈઃ વિજ્ઞાત બ્રહ્મલૌકિકૈઃ ॥ ૧૪૫॥

પુરાઽસુરાણાં ક્ષેમાર્થં ત્રિપુરઞ્ચ વિનિર્મ્મિતમ્ ।
યત્રતૈર્દાનવૈર્દ્દેવા દેવલોકે પરાજિતાઃ ॥ ૧૪૬॥

તદા બ્રહ્માજ્ઞયા દેવૈર્વિશ્વકર્મા પ્રચોદિતઃ ।
વિનિર્મ્માય ધનૂરત્નં શઙ્કરાય નિવેદિતમ્ ॥ ૧૪૭॥

તેનૈવ ધનુષારુદ્રો દદાહ ત્રિપુરંરુષા ।
પુનઃ પ્રસન્નોભગવાન્ દેવરાતસ્ય ભક્તિતઃ ॥ ૧૪૮॥

ન્યાસભૂતમિદન્તત્ર સ્થાપિતં હ્યપરન્ધનુઃ ।
તદા પ્રભૃતિતદ્વંશૈઃ પૂજિતં તદ્વરં ધનુમ્ ॥ ૧૪૯॥

પરમ્પરાક્રમપ્રાપ્તં જનકસ્યમહાત્મનઃ ।
તેન સમ્પૂજિતં બ્રહ્મન્ ધનુઃ સર્વાઘનાશનમ્ ॥ ૧૫૦॥

તસ્યાત્મજા સમુત્પન્ના જાનકી લોકવિશ્રુતા ।
તસ્યાઃ સ્વયમ્વરે શુક્લં ધનુરેતદ્વિનિશ્ચિતમ્ ॥ ૧૫૧॥

કૈશ્ચિન્ન ચાલિતન્તચ્ચ સ્થાનાદ્ગુરુતરં ધનુમ્ ।
મહાદેવ પ્રભાવાદ્ય સ્વશક્ત્યા ગૌરવેણ ચ ॥ ૧૫૨॥

કૌશિકેન સહાયાતો રામો દશરથાત્મજઃ ।
દિદૃક્ષુશ્ચ પિનાકસ્ય યજ્ઞરાષ્ટમુપાગમત્ ॥ ૧૫૩॥

તેન ચોત્થાપિતંસજ્જં વિકૃષ્ટં ગુરુસારવત્ ।
મધ્યેભગ્નં ધનુર્ભીમં ઇતિલોકેષુવિશ્રુતમ્ ॥ ૧૫૪॥

તદેતચ્છામ્ભવન્દિવ્યં વિશ્વકર્મ્મા વિનિર્મ્મિતમ્ ।
યથારામેશ્વરંલિઙ્ગં ધનુષો દર્શનન્તથા ॥ ૧૫૫॥

અતિપાતક જાતાનાં સાધનં દ્વિતયમ્મતમ્ ।
કલૌયેન મહાભાગ કૃતાયાત્રા સ્વયમ્મુને ॥ ૧૫૬॥

અથવાતં નમસ્યન્તિ જીવન્મુક્ત તમોહિસઃ ।
પરલોક ભયાદ્ભીતાસ્તં નમસ્યન્તિ યેનરાઃ ॥ ૧૫૭॥

તેપિપાપૈર્વિમુચ્યન્તે પ્રયાન્તિ શુભગાઙ્ગતિમ્ ।
મનુષ્ય દેહમાસાદ્યયે ન રામેશ્વરઙ્ગતાઃ ॥ ૧૫૮॥

તેપાપિષ્ઠાસ્તુ લોકેઽસ્મિન્ દેવતા ક્રોશમાજનાઃ ।
આલશ્ય દૂરદેશસ્થા યેન યાન્તિ મહામુને ॥ ૧૫૯॥

દ્રષ્ટ્રંવૈવાલુકાલિઙ્ગં સેતુબન્ધશિવસ્થિતમ્ ।
પ્રાયશ્ચિત્તં ભવેત્તેષાં ઘોર પાપવિશોધનમ્ ॥ ૧૬૦॥

મિથિલાયાં સમાગમ્ય યેદૃષ્ટ્વ શામ્ભવન્ધનુઃ ।
પાપાપનોદનન્તેષાં જાયતે તસ્યદર્શનાત્ ॥ ૧૬૧॥

તસ્માત્સર્વ્વ પ્રયત્નેન ધનુર્યાત્રાં સમાચરેત્ ।
યેનદૃષ્ટં ધનુઃખણ્ડં સર્વ્વ પાપાપનોદનમ્ ॥ ૧૬૨॥

શ્રીરામકરજસ્પૃષ્ટં સાક્ષાદ્ભુવનપાવનમ્ ।
પ્રત્યક્ષં જ્ઞાપકં શ્રેષ્ઠ ધનુર્વ્વીર્ય્ય પ્રકાશનમ્ ॥ ૧૬૩॥

આસૃષ્ટિ નિશ્ચલન્દિવ્યં સ્થાસ્યત્યવનિમણ્ડલે ।
મહાવૈષ્ણવસંસ્કારૈર્મહાયજ્ઞ વ્રતાદિભિઃ ॥ ૧૬૪॥

મહાપુણ્યાતિરેકૈશ્ચ ધનુષોદર્શનમ્ભવેત્ ।
એતદ્રહસ્યં સર્વ્વસ્વં સર્વ્વ બ્રહ્મર્ષિ સઙ્ગતમ્ ॥ ૧૬૫॥

પુરાણજ્ઞૈશ્ચ નિર્ણીતં યદ્રામાભિમુખો ભવેત્ ॥ ૧૬૬॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે સપ્તદશોઽધ્યાયઃ ।

## ૧૮

મૈત્રેય ઉવાચ -
મિથિલા નિમિવંશ્યાનાં રાજધાનીતિમેશ્રુતમ્ ।
સાકથમ્પુણ્યતીર્થેષુ ગમ્યતે તદ્વદાધુના ॥ ૧૬૭॥

પરાશર ઉવાચ -
હરેરારાધનં લોકે યત્ર યત્ર જલેકૃતમ્ ।
તદેવતીર્થં વિજ્ઞેયં દર્શનાત્પુણ્યદં નૃણામ્ ॥ ૧૬૮॥

ઇયન્તુ મિથિલાપુણ્યા સ્વયં રામસ્વરૂપિણી ।
ન સાપેક્ષાન્ય સંસ્કારૈર્ન્નસાપેક્ષા સુરાલયૈઃ ॥ ૧૬૯॥

પરન્તુ મુનિભિઃ પૂર્વ્વૈઃ કાઞ્ચનારણ્ય વાસિભિઃ ।
હરેરારાધનં પુણ્યં  બહુધાતત્રવૈકૃતમ્ ॥ ૧૭૦॥

વૈવસ્વત મનોર્વ્વંશ ઇક્ષ્વાકોસ્તનયોનિભિઃ ।
ગૌતમયાજકઞ્ચાત્ર યજ્ઞમત્રૈવ ચાકરોત્ ॥ ૧૭૧॥

વશિષ્ઠે નરુષાશપ્તો વશિષ્ઠઞ્ચાપિ સોઽશપત્ ॥ ૧૭૨॥

વિદેહત્વન્દ્વયોરાસીત્ પુરાણેષુકથાસ્ફુટા ।
પુનર્ન્નિમિ શરીરસ્ય મત્થનં મુનિભિઃ કૃતમ્ ॥ ૧૭૩॥

મિથિસ્તત્રસમુત્પન્નો  મિથિલાતેન સાભવત્ ।
તદાપ્રભૃતિ તદ્વંશ્યૈ રાજધાની નિરૂપિતા ॥ ૧૭૪॥

રાજાનઃ સ્વમહાભાગા દર્શને ગૃહમેધિનઃ ।
પરન્તુ મુનિભિસ્તુલ્યા તપોયોગ સમાધિષુ ॥ ૧૭૫॥

નિર્લ્લેપામાયિકૈર્ભોગૈ પદ્મપત્રમિવામ્ભસા ।
જ્ઞાનવિજ્ઞાનસારજ્ઞા પરમાનન્દલક્ષણા ॥ ૧૭૬॥

વિશેષતો રાજરત્નં જનકોનામનામતઃ ।
જાનકી યત્રચોત્પન્ના નિમિવંશ પ્રકાશિની ॥ ૧૭૭॥

યસ્ય ભક્તિપ્રભાવેણ રામોદાશરથિઃ પ્રભુઃ ।
જામાતૃત્વં સમુત્પન્નો કૌતુકે ફલદપ્રદઃ ॥ ૧૭૮॥

તસ્યેય નગરી પુણ્યા તેનજાતા મહાફલા ।
વિખ્યાતા જાનકીનામ્ના વિશેષેણાભવન્મુને ॥ ૧૭૯॥

મૈત્રેય ઉવાચ -
કથં સીતા સમુત્પન્ના તસ્યલાઙ્ગલ પદ્ધતૌ ।
કસ્ય પુણ્યાતિરેકેણ તદીયા તનયા ભવત્ ॥ ૧૮૦॥

પરાશર ઉવાચ -
જનકાનાં કુલે બ્રહ્મન્ મહર્ષિ સમતેજસામ્ ।
મર્ય્યાદયા સમાપન્નં સર્વ્વલોકેષુ વિશ્રુતમ્ ॥ ૧૮૧॥

જ્ઞાનવિજ્ઞાન સમ્પન્નં આધિવ્યાધિવિવર્જ્જિતમ્ ।
હર્ષરોમા વિશેષેણ લોકેવિખ્યાત પૌરુષઃ ॥ ૧૮૨॥

તસ્ય પુત્રદ્વયં ચાસીજ્જ્યેષ્ઠ સીરધ્વજોમતઃ ।
તદ્ગુણૈઃ સમતાંખ્યાતો દ્વિતીયસ્તુ કુશધ્વજઃ ॥ ૧૮૩॥

સર્વ્વે તદ્વંશજાઃ ભૂપાઃ ખ્યાતા જનક નામતઃ ।
તેનાસૌ સર્વ્વલોકેષુ વિખ્યાતો જનકાભિધઃ ॥ ૧૮૪॥

પિતુર્ય્યુપરતે રાજ્યે સ્થાપિતો જનકાભિધઃ ।
જ્યેષ્ઠઃ સીરધ્વજોરાજા ગ્રન્થાનામા કરોમહાન્ ॥ ૧૮૫॥

ધર્મેણ પાલયન્ રાજ્યમધર્માત્પરિવર્જ્જયન્ ।
સશશામ મિથિર્ય્યોવૈ રાજ્યન્નિહતકણ્ટકમ્ ॥ ૧૮૬॥

સ્વયમ્પ્રાદુરભૂદ્ધર્મ્માદ્રત્નં સ્વર્ણં ખનિઙ્ગિરૌ ।
ધનધાન્યવતી સ્ફીતા ભૂમિઃ કામદુધાવભૌ ॥ ૧૮૭॥

ઈજ્યતે બહુવિધૈર્ય્યજ્ઞૈઃ દેવતા તુષ્ટિકારકૈઃ ।
બ્રાહ્મણાન્તોષયામાસ દાનસમ્માન ભક્તિભિઃ ॥ ૧૮૮॥

તસ્ય શાસિત ધર્મ્મેણ રાજ્યેનિહતકણ્ટકે ।
અનાવૃષ્ટિઃ સમાપન્ના યથાસમ્પીડિતાપ્રજાઃ ॥ ૧૮૯॥

મહર્ષિભિઃ સમાદિષ્ટ માર્ગેણ મિથિલાધિપઃ ।
માધવે ધવલેપક્ષે નવમ્યાં યજ્ઞમારભેત્ ॥ ૧૯૦॥

સ્વર્ણલાઙ્ગલમાદાય વિચકર્ષ મહીતલમ્ ।
તત્રપુત્રીસમુત્પન્ના તાન્તદાગૃહમાનયત્ ॥ ૧૯૧॥

જાનકીતેનવૈનામ્નો વિખ્યાતા ભુવનત્રયે ॥ ૧૯૨॥

કદાચિન્નારદો યોગી તત્રાગત્ય મહામુનિઃ ।
સીતેતિનામ્નાચાભાષ્ય રહસ્યં તદુપાદિશત્ ॥ ૧૯૩॥

નારદ ઉવાચ -
ઇયમ્પુત્રીમહાભાગા કુલોદ્યોતકરીતિ ચ ।
સીતેતિનામ્ના વિખ્યાતા ભવિષ્યતિ જગત્રયે ॥ ૧૯૪॥

અસ્યાભર્ત્તા પ્રભુસ્સાક્ષાત્પરમાત્મા ભવિષ્યતિ ॥ ૧૯૫॥

એતદર્થંહિભવતા કર્ત્તવ્યં યત્નમુત્તમમ્ ।
સ્વયમ્વરે પ્રકર્ત્તવ્યં ધનુરુત્થાપનમ્પણમ્ ॥ ૧૯૬॥

નાન્યશ્ચાલયિતાચાપં પ્રભોશ્ચપુરુષાદૃતે ।
તસ્યસમ્બન્ધતોરાજન્ ! સર્વ્વાન્ કામાનવાપ્સ્યસિ ॥ ૧૯૭॥

ઇયન્તુ તુલયારાજન્ ચતુર્વર્ગ પ્રદાયિની ।
આપન્નાનાં પ્રયત્નાનાં સર્વ્વાપદ્વિનિવારિણી ॥ ૧૯૮॥

ધન્યોસિ કૃતકૃત્યોસિ લોકવન્દ્યોસિ ભૂપતે ।
યત્ત્વયા તનયાલબ્ધા હ્રી, શ્રી, કીર્ત્યાદિવન્દિતા ॥ ૧૯૯॥

ઇત્યુપાદિશ્ય રાજેન્દ્ર બ્રહ્મલોકં જગામસઃ ।
ત્વત્પ્રીત્યા વર્ણિતં સર્વ્વં રહસ્યં મિથિલોદ્ભવમ્ ॥ ૨૦૦॥

એતચ્ચભાવયેન્નિત્યં શ્રુત્વાવૈ હૃદિધારયેત્ ।
તસ્ય તુષ્ટા ભવેત્સીતા સાક્ષાદ્રાઘવવલ્લભા ॥ ૨૦૨॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે અષ્ટાદશાધ્યાયઃ ।

## ૧૯

મૈત્રેય ઉવાચ-
વિચિત્રમિહમાખ્યાતં વર્ણિતં ભવતામુને! ।
વૈશાખે જાનકીજાતા વ્રતં તત્ર કથં ભવેત્ ॥ ૨૦૨॥

નિર્ણયસ્તસ્ય કાલસ્ય વિધિશ્ચાપિમુનીશ્વરૈઃ ।

યથાવિનિર્ણિતઃ શાસ્ત્રે સિદ્ધાન્તં તસ્યશંસમે ॥ ૨૦૩॥

પરાશર ઉવાચ-
વૈશાખસ્ય સિતેપક્ષે નવમી મઘસંયુતા ।
સૈવમધ્યાહ્નયોગેન શસ્યતે વ્રતકર્મ્મણિ ॥ ૨૦૪॥

વિવિધાપિ તિથિર્ગ્રાહ્યા નવમીશબ્દસઙ્ગ્રહાત્ ।
તિથિક્ષયે તિથેર્વૃદ્ધૌ તિથેર્વિદ્ધેથવામુને ॥ ૨૦૫॥

મધ્યાહ્નવ્યાપિનીગ્રાહ્યા કર્મકાલસ્તુશસ્યતે ।
પરવશસ્યતેતદ્વૈ મધ્યાહ્નેચેદ્દિનદ્વયે ॥ ૨૦૬॥

દિનદ્વયેપિતદ્વ્યાપ્તૌ તદાસા ગૃહ્યતેપરા ।
દશમ્યાં પારણંશસ્તં દશમીં નૈવલઙ્ઘયેત્ ॥ ૨૦૭॥

ઉપવાસ ક્રમોરામ નવમ્યાંહિ યદાચરેત્ ।
પુણ્યશ્રીસુ ગૃહસ્થશ્ચ શ્રદ્ધાવાંશ્ચ દ્વિજાલયે ॥ ૨૦૮॥

નિર્મ્માય મણ્ડપશ્રેષ્ઠં તત્ર પૂજનમાચરેત્ ।
સૌવર્ણીં રાજતીઞ્ચાપિ પ્રતિમાં કારયેન્નવીમ્ ॥ ૨૦૯॥

પલૈઃ ષોડશભિઃ કાર્ય્યા દશપઞ્ચભિરેવવા ।
તાવદ્ભિઃ કર્ષપૈર્વ્વાપિ તાવન્માષૈરથાપિવા ॥ ૨૧૦॥

વિત્તસાઠ્યન્નકુર્વ્વીત સર્વ્વધર્મ્મ ક્રિયાદિષુ ।
જ્ઞાનમુદ્રાધરં જ્ઞાનં વીરાસન સમાશ્રિતમ્ ॥ ૨૧૧॥

દિવ્યસિંહાસનાસીનં ન્યસેદષ્ટ દલાશ્રયે ।
શ્રીરામ વામભાગસ્થાં સીતાં સર્વ્વાઙ્ગશોભનામ્ ॥ ૨૧૨॥

નીલપદ્મધરાન્દેવીં કારયેત્સાધકોત્તમઃ ।
લક્ષ્મણં પશ્ચિમે ભાગે ધૃતચ્છત્રં સચામરમ્ ॥ ૨૧૩॥

પાર્શ્વે ભરત શત્રુઘ્નૌ તાલવૃન્ત કરાવુભૌ ।
આઞ્જનેયં તથાચાગ્રે એષવૈ પ્રતિમાક્રમઃ ॥ ૨૧૪॥

પૂજાસ્યાદ્વૈષ્ણવે પીઠે વેદિકોપરિ સંસ્થિતે ।
પ્રાણપ્રતિષ્ઠા મન્ત્રૈશ્ચન્યસેત્પ્રાણાન્ પ્રયત્નતઃ ॥ ૨૧૫॥

સંસ્કારાન્ વિધિવત્કૃત્વા દેવમાવાહ્ય પૂજયેત્ ।
આસનં સ્વાગતં પાદ્યં અર્ઘ્યમાચમનીયકમ્ ॥ ૨૧૬॥

ગન્ધપુષ્પન્તથાદીપૈઃ ધૂપનૈવેદ્યમેવ ચ ।
તામ્બૂલઞ્ચેતિરામસ્ય સીતાયાશ્ચાપિપૂજનમ્ ॥ ૨૧૭॥

યજ્ઞસૂત્રોપચારેતુ સીતાયૈભૂષણન્ન્યસેત્ ।
સચ્છત્રં ચામરન્દત્વા લક્ષ્મણમ્પૂજયેતતઃ ॥ ૨૧૮॥

ગન્ધપુષ્પં તથાધૂપં દીપન્નૈવેદ્યમેવચ ।
પઞ્ચાઙ્ગમેતત્સર્વ્વેષાં પૂજાયાએષવૈક્રમઃ ॥ ૨૧૯॥

પૂજા પુરુષ સૂક્તૈશ્ચ રાઘવસ્યપ્રશસ્યતે ।
શ્રીસૂક્તૈર્જાનકીપૂજા કાર્য્યા સા સાધકોત્તમૈઃ ॥ ૨૨૦॥

અન્યેષાં નામમાત્રેણ ચતુર્થ્યન્તેનપૂજયેત્ ।
અથવા બ્રહ્મગાયત્ર્યા સર્વ્વપૂજન સિદ્ધયે ॥ ૨૨૧॥

એવં હોમોઽપિ કર્ત્તવ્યઃ તર્પ્પણસ્યૈષવૈક્રમઃ ।
પુનઃ શઙ્ખજલં ગ્રાહ્યં અર્ઘન્દત્વા વિચક્ષણઃ ॥ ૨૨૨॥

રામભદ્ર મહાભાગ રઘુવીરનૃપોત્તમઃ ।
ગૃહાણાર્ઘં મયાદત્તં કૃપયા રઘુનન્દન ॥ ૨૨૩॥

ઉતપન્નાસિ મહાભાગે સ્વર્ણલાઙ્ગલપદ્ધતૌ ।
ગૃહાણાર્ઘ્યં મયાદત્તં કૃપયા મિથિલેશજે ॥ ૨૨૪॥

મિથિલાધીશ્વરં પાર્શ્વે જનકં તત્ર પૂજયેત્ ।
પઞ્ચાઙ્ગ પૂજનં કૃત્વા અર્ઘ્યન્તસ્મૈનિવેદયેત્ ॥ ૨૨૫॥

વિદેહાધિપરાજેન્દ્ર મિથિલેશ કૃપાનિધે ।
ગૃહાણાર્ઘ્યં મયાદત્તં સર્વ્વસિદ્ધિં પ્રયચ્છ મે ॥ ૨૨૬॥

નર્ત્તનં ગીતવાદ્યાદિ કૃત્વા ચ દિવસન્નયેત્ ।
રાત્રાવપિમહાપૂજા કૃત્વાજાગરણાઞ્ચરેત્ ॥ ૨૨૭॥

પારણાહેદ્વિજાયાથ ભોજયિત્વાતુભક્તિભિઃ ।
શુચયે દેવભક્તાય પ્રતિમાન્તાન્નિવેદયેત્ ॥ ૨૨૮॥

અથવા યદિચેદ્ભક્તિઃ પૂજાયાં નૈષ્ઠિકીભવેત્ ।
તદાતાં સ્વગૃહેસ્થાપ્યં પૂજયેત્પ્રત્યહં સુધીઃ ॥ ૨૨૯॥

આચાર્ય્યાય પ્રદાતવ્યા દક્ષિણાહ્વાઞ્ચનં ભુવમ્ ।

ગાં સવત્સાન્નવંવસ્ત્રં રત્નન્ધાન્યં ગૃહાદિકમ્ ॥ ૨૩૦॥

અથવા શક્તિતોદેયં યથાતુષ્યેદ્વિજોત્તમઃ ।
ભૂયસીં દક્ષિણાન્દદ્યાત્ સ્વસ્તિવાચનપૂર્વકમ્ ॥ ૨૩૧॥

એવમારાધિતોરામઃ સીતયા સહભક્તિતઃ ।
દદાતિપરમાન્ કામાન્ સુરાણામપિદુર્લભમ્ ॥ ૨૩૨॥

નાનેન સદૃશમ્પુણ્યં નાનેન સદૃશંવ્રતમ્ ।
રામતોજાયતે ધર્મ્મં નાનેનસદૃશઙ્ક્વચિત્ ॥ ૨૩૩॥

સુરાપી બ્રહ્માસ્તેયી ગુરુપત્ની પ્રધર્ષકઃ ।
શુદ્ધતામાપ્નુયુસ્સર્વ્વે પ્રયાન્તિ પરમાઙ્ગતિમ્ ॥ ૨૩૪॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે એકોનવિંશોઽધ્યાયઃ ।

## ૨૦

મૈત્રેય ઉવાચ-
મિથિલાધિપતેર્વ્વેશ્મ દુર્ગાણિ પરિખાસ્તથા ।
અન્તઃપુરાણિ સર્વ્વાણિ યથાકારાણિવર્ણય ॥ ૨૩૫॥

પરાશર ઉવાચ-
દુર્ગઞ્જનકરાયસ્ય પરિખા ત્રિતયાન્વિતા ।
નેકશાલ સમુત્સૌધં દુર્ગ કુટ્ટિમસંયુતમ્ ॥ ૨૩૬॥

વણિજામાપણૈર્યુક્તં વીરાવાસવિરાજિતમ્ ।
નિમિવંશ પ્રસૂતાનાં ગૃહરત્નં સુશોભિતમ્ ॥ ૨૩૭॥

તન્મધ્યે રાજરાજસ્ય સ્ફટિકં મન્દિરંવરમ્ ।
વામેત્વંશે ધ્વજાવાસં ગૃહરત્નૈઃ સમન્વિતમ્ ॥ ૨૩૮॥

રાજરાજ ગૃહોપાન્તે ગજાશ્વ ભવનાનિ ચ ।
ગોપુરં પ્રાગ્ભવદ્વારં તદન્તર્વ્વર્ત્તિનીસભા ॥ ૨૩૯॥

ઐશાન્યાં રાજતે બ્રહ્મન્ મહારત્નૌઘસઙ્કુલમ્ ।
વાયવ્યેતુગૃહારામં નૈર્ઋત્યેકોશ સઞ્ચયમ્ ॥ ૨૪૦॥

પૂર્વે રઙ્ગાવલીમ્વિદ્યાદિતિ વૈ મન્દિરક્રમમ્ ।
મધ્યેરાજાલયંશ્રેષ્ઠં તન્મધ્યે સ્વર્ણમણ્ડપમ્ ॥ ૨૪૧॥

સુવર્ણ મણ્ડપં દૃષ્ટ્વા સર્વ્વઙ્કાલેષુ માનવઃ ।
સાયુજ્ય ફલમાપ્નોતિ રામસાન્નિધ્યમેવ ચ ॥ ૨૪૨॥

મહાપાતકિનોલોકે પાપિષ્ઠા યે નરાધમાઃ ।
પશવઃ પક્ષિણઃ પ્રેતા યેવા તે પાપયોનયઃ ॥ ૨૪૩॥

કથઞ્ચિત્તત્ર ચેજ્જાતાસ્તેપિયાન્તિ પરરાઙ્ગતિમ્ ।
કિમ્પુનર્ય્યાન્તિયેભક્ત્યા જાનન્તુતત્ફલમ્મુને ॥ ૨૪૪॥

એવમેવવિધાનેન રાજતે રાજમન્દિરમ્ ।
રાજાલયે વશિષ્ઠસ્ય ઐશાન્યાં કલ્પપાદપમ્ ॥ ૨૪૫॥

એવમાદિ પ્રકારેણ દિવ્યસમ્પત્તિશોભિતમ્ ।
દુર્ગં દુર્ગતમં દિવ્યં વિખ્યાતં ભુવનત્રયે ॥ ૨૪૬॥

સમારભ્ય મહાભાગ પૂર્વ્વે હરિહરાલયે ।
તથા મૈત્રેય નિર્દ્દિષ્ટં પશ્ચિમેવાજલેશ્વરમ્ ॥ ૨૪૭॥

ગિરિજાલયમારભ્ય યાવદ્વૈ ધનુષસ્થિતમ્ ।
ઇતિદુર્ગસ્યમર્ય્યાદા મિથિલા સા મહાપુરી ॥ ૨૪૮॥

તત્પ્રાન્ત વાટિકામિશ્ચ વિવિધૈશ્ચ જલાશયૈઃ ।
શોભતેતીરભુક્તિશ્ચ ધનધાન્ય સમાકુલા ॥ ૨૪૯॥

ઉત્તરે કાઞ્ચનારણ્યં મહર્ષિગણ શોભિતમ્ ।
બહુપુષ્પ ફલોપેતન્દ્વિતીયમિવનન્દનમ્ ॥ ૨૫૦॥

સરોજ વનમાખ્યાતં સન્તાન વનમેવ ચ ।
મન્દારવનમિત્યેવ સર્વ્વતઃ પુષ્પિતદ્રુમમ્ ॥ ૨૫૧॥

ચમ્પકારણ્યમાખ્યાત કેલિકૌતુક કાનનમ્ ।
કુમુદં સુખદમ્પ્રોક્તં વસન્તારણ્યમેવ ચ ॥ ૨૫૨॥

સ્ફટિકં પ્રતિમઞ્ચૈવ તથાનન્દવિવર્દ્ધનમ્ ।
શ‍ૃઙ્ગાર કાનનઞ્ચૈવ ઉપમાન તિરસ્કૃતમ્ ॥ ૨૫૩॥

સુગન્ધિરસસમ્પન્નં સુગન્ધિકુસુમાકરમ્ ।
કન્દરં કાન્તિકલ્લોલં લવઙ્ગવનમેવ ચ ॥ ૨૫૪॥

કેતકી વનમિત્યેવ કાઞ્ચનારણ્ય મધ્યમમ્ ।
તત્પ્રાન્તે ગિરયઃ પઞ્ચ તેષાં નામાનિમેશ‍ૃણુ ॥ ૨૫૫॥

કુલાદ્રિઃ પશ્ચિમેખ્યાતઃ સ્વર્ણાદ્રિસ્તુ તથોત્તરે ।
કૌતુકાદ્રિસ્તથાવામે પૂર્વ ભાગે મધુશ્રવઃ ॥ ૨૫૬॥

સઞ્જીવન ગિરિર્મધ્યે ખ્યાતોલોકત્રયેમુને ।
દુર્ગસ્ય પશ્ચિમે ભાગે યોજનત્રિતયાભિધમ્ ॥ ૨૫૭॥

યજ્ઞસ્થલં નરેન્દ્રસ્ય  યત્રલાઙ્ગલપદ્ધતૌ ।
સમુત્પન્નામહાભાગા સીતારાઘવવલ્લભા ॥ ૨૫૮॥

તદ્વિશેષફલં લોકે સર્વ્વકામપ્રદાયિકામ્ ।
મિથિલા સર્વ્વતઃ પુણ્યા સર્વ્વાકારેણ શોભિતા ॥ ૨૫૯॥

તસ્યાં નિવાસિનાં પુણ્યં મયાવક્તું ન શક્યતે ।
સદ્યો વિનાશયેત્પાપં મિથિલેતિપ્રકીર્તનાત્ ॥ ૨૬૦॥

ધન્યાસ્તે યે પ્રયત્નેન નિવસન્તિ મહામુને ।
વિચરેન્મિથિલામધ્યે ગ્રામેગ્રામે વિચક્ષણઃ ॥ ૨૬૧॥

સખણ્ડાનાં વિધિરિયં વીતરાગવતામપિ ।
કપિલેશ્વરમારભ્ય હરિણાક્ષીઞ્ચ પાવનીમ્ ॥ ૨૬૨॥

પિપ્પલીવનમાગત્ય પુનઃ પુષ્પહરં વ્રજેત્ ।
રૂપસ્થાનં પુનર્ગત્વા વર્ણસ્થાનં તતોવ્રજેત્ ॥ ૨૬૩॥

વિલાવતીં હરિત્વેકીં ગચ્છેત્કૂપેશ્વરમ્પુનઃ ।
મિથિલેશપુરં ગત્વા વનમામદ્રમાલયમ્ ॥ ૨૬૪॥

પુનઃ સિંહેશ્વરઙ્ગત્વા તારવલ્લીંસપિપ્પલીમ્ ।
સિંહોલકામથોગત્વા પુનશ્ચત્રપનાયનમ્ ॥ ૨૬૫॥

સિન્દૂરેશ્વરકઙ્ગત્વા તતો રાજાલયંવ્રજેત્ ।
સૃખેલીં સમુપાગમ્ય ગચ્છેદ્વિષહરં તતઃ ॥ ૨૬૬॥

મઙ્ગલાં મઙ્ગલવતીં વિરજાં પાપ હારિણીમ્ ।
વલવર્દ્ધકભાવિન્યાં જામ્વતીં જીવ પુત્રિકામ્ ॥ ૨૬૭॥

એવંવૈમિથિલોપાન્તે વસન્ ગ્રામેષ્વનન્યધીઃ ।
નયેત્કાલં કૃપાપાત્રં વિચરન્સાધકોત્તમઃ ॥ ૨૬૮॥

સમ્પન્નાનાં વિધિરિયં મુનીનાં વીતરાગિણામ્ ।

નિવસેદુરજં કૃત્વા વાણપ્રસ્થોઽથવાક્વચિત્ ॥ ૨૬૯॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે વિંશોઽધ્યાયઃ ।

## ૨૧

પરાશર ઉવાચ-
ઇદં સમાસતઃ પ્રોક્તં તવ પ્રીત્યા મયાધુના ।
માહાત્મ્યં મિથિલાયાશ્ચ કોપિવક્તું ન શક્યતે ॥ ૨૭૦॥

રામતુષ્ટિકરાંલોકે સર્વ્વકામસમૃદ્ધિનીમ્ ।
મિથિલા સર્વ્વતઃ પુણ્યા સુરાણામપિ દુર્લભમ્ ॥ ૨૭૧॥

પ્રયાગે બહુવર્ષાણિ કાશ્યાંવા બહુવાર્ષિકમ્ ।
નૈમિષેવા કુરુક્ષેત્રે જન્માવધિવસેન્નરઃ ॥ ૨૭૨॥

અવન્ત્યાં વિષ્ણુકાઞ્ચીઞ્ચ નરનારાયણાશ્રમે ।
વ્યઙ્કટેઽદ્રૌ મહાપીઠે ગઙ્ગાસાગર સઙ્ગમે ॥ ૨૭૩॥

મુક્તિક્ષેત્રે હરિદ્વારે બ્રહ્માવર્ત્તે ગયાશિરે ।
આજન્મ નિવસેદ્યસ્તુ પરિક્રામે ભુવન્તથા ॥ ૨૭૪॥

ગવાં લક્ષપ્રદાતા ચ શતપ્રામપ્રદાયકઃ ।
સુવર્ણમેરુદાતા ચ રત્નાકર પ્રદાયકઃ ॥ ૨૭૫॥

યાજકઃ સર્વ્વયજ્ઞાનાં સ્વાધ્યાય નિરતસ્તથા ।
કુબ્જાતિ કુબ્જકર્ત્તા ચ પ્રાજાપત્યેનિવર્ત્તકઃ ॥ ૨૭૬॥

પારાકાદિ વ્રતૈર્યુક્તશ્ચન્દ્રાયણ વિવર્ત્તકઃ ।
તિલાશી ચ તથૈવાહ પઞ્ચગવ્યેન વર્ત્તકઃ ॥ ૨૭૭॥

પત્રાહારી જલાહારી નિરાહારસ્તથૈવ ચ ।
દરીશાયી ગિરૌવાસી ગ્રીષ્મેપઞ્ચાગ્નિ સેવકઃ ॥ ૨૭૮॥

સએવતિલાવાસી શિશિરે સલિલેશયઃ ।
ઊર્દ્ધ્વ વાહુર્વ્વસંચ્યશ્ચ સ્થાણુઃ કામાકુણિસ્તથા ॥ ૨૭૯॥

બ્રહ્મક્ષત્રાનુવર્ત્તી ચ તત્વજ્ઞાનૈકચિન્તકઃ ।
યાગેષ્વભિરતશ્ચૈવ દેવતાર્ચ્ચન તત્પરઃ ॥ ૨૮૦॥

પુરશ્ચર્ય્યાવતશ્ચૈવ હવિષ્યાશી જિતેન્દ્રિયઃ ।

નિખિલૈઃ સાધનૈઃ સ્વીયૈર્વ્બહુજન્મ સમર્જ્જિતૈઃ ॥ ૨૮૧॥

મહાપુણ્યાતિરેકૈશ્ચ ? ચ ભારતે ।
મિથિલાયા નિવાસસ્ય નરાઃ સંય્યાન્તિયોગ્યતામ્ ॥ ૨૮૨॥

ય ઇદં શ્રાવયેન્નિત્યં શ્રુત્વાનાહૃદિધારયેત્ ।
સીતારામૌહૃદિન્યસ્ય નત્વા સમ્પ્રાપ્નુયાદ્ધ્રુવમ્ ॥ ૨૮૩॥

પ્રીયન્તે પિતરસ્તસ્ય પ્રીયન્તે તસ્યદેવતાઃ ।
દેવાનાં માન્યતાલબ્ધ્વા સર્વ્વાન્ કામાનવાપ્નુયાત્ ॥ ૨૮૪॥

-ઇતિ શ્રીબૃહદ્વિષ્ણુપુરાણે મિથિલામાહાત્મ્યે પરાશર-મૈત્રેયસંવાદે
એકવિંશોઽધ્યાયે મિથિલામાહાત્મ્યં સમ્પૂર્ણમ્ ।

---

*Mithilamahatmyam from Brihadvishnupurana*

pdf was typeset on July 4, 2024

Please send corrections to *sanskrit@cheerful.com*